শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে একোনাশীতিতমং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে একোনাশীতিতমং দশকম্ ॥

## রুক্মিণীস্ৱযংৱরৱর্ণনম্

বলসমেতবলানুগতো ভৱান্
    পুরমগাহত ভীষ্মকমানিতঃ।
দ্ৱিজসুতং ৎৱদুপাগমৱাদিনং
    ধৃতরসা তরসা প্রণনাম সা॥ **79.1** ॥

ভুৱনকান্তমৱেক্ষ্য ভৱদ্ৱপু -
    র্নৃপসুতস্য নিশম্য চ চেষ্টিতম্।
ৱিপুলখেদজুষাং পুরৱাসিনাং
    সরুদিতৈরুদিতৈরগমন্নিশা॥ **79.2** ॥

তদনু ৱন্দিতুমিন্দুমুখী শিৱাং
    ৱিহিতমঙ্গলভূষণভাসুরা।
নিরগমদ্ভৱদর্পিতজীৱিতা
    স্ৱপুরতঃ পুরতঃ সুভটাৱৃতা॥ **79.3** ॥

কুলৱধূভিরুপেত্য কুমারিকা
    গিরিসুতাং পরিপূজ্য চ সাদরম্।
মুহুরযাচত তৎপদপঙ্কজে
    নিপতিতা পতিতাং তৱ কেৱলম্॥ **79.4** ॥

সমৱলোককুতূহলসঙ্কুলে
    নৃপকুলে নিভৃতং ৎৱযি চ স্থিতে।

নৃপসুতা নিরগাদ্ গিরিজালযাৎ
   সুরুচিরং রুচিরঞ্জিতদিঙ্মুখা॥ **79.5**॥

ভুৱনমোহনরূপরুচা তদা
   ৱিৱশিতাখিলরাজকদম্বযা।
ৎৱমপি দেৱ কটাক্ষৱিমোক্ষণৈঃ
   প্রমদযা মদযাঞ্চকৃষে মনাক্॥ **79.6**॥

ক্বনু গমিষ্যসি চন্দ্রমুখীতি তাং
   সরসমেত্য করেণ হরন্ ক্ষণাৎ।
সমধিরোপ্য রথং ৎৱমপাহৃথা
   ভুৱি ততো ৱিততো নিনদো দ্বিষাম্॥ **79.7**॥

ক্বনু গতঃ পশুপাল ইতি ক্রুধা
   কৃতরণা যদুভিশ্চ জিতা নৃপাঃ।
ন তু ভৱানুদচাল্যত তৈরহো
   পিশুনকৈঃ শুনকৈরিৱ কেসরী॥ **79.8**॥

তদনু রুক্মিণমাগতমাহৱে
   ৱধমুপেক্ষ্য নিবধ্য ৱিরূপযন্।
হৃতমদং পরিমুচ্য বলোক্তিভিঃ
   পুরমযা রমযা সহ কান্তযা॥ **79.9**॥

নৱসমাগমলজ্জিতমানসাং
   প্রণযকৌতুকজৃম্ভিতমন্মথাম্।
অরমযঃ খলু নাথ যথাসুখং
   রহসি তাং হসিতাংশুলসন্মুখীম্॥ **79.10**॥

ৱিৱিধনর্মভিরেৱমহর্নিশং
   প্রমদমাকলযন্ পুনরেকদা।

ঋজুমতেঃ কিল ৱক্রগিরা ভৱান্
ৱরতনোরতনোদতিলোলতাম্॥ **79.11** ॥

তদধিকৈরথ লালন কৌশলৈঃ
প্রণযিনীমধিকং সুখযন্নিমাম্।
অযি মুকুন্দ ভৱচ্চরিতানি নঃ
প্রগদতাং গদতান্তিমপাকুরু॥ **79.12** ॥

॥ ইতি শ্রীমন্নারাযণীযে একোনাশীতিতমং দশকং সমাপ্তম্॥